# 2023

## SANSKRIT — GENERAL

**Paper : GE/CC-1**

**(Sanskrit Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

**(Marks : 20)**

**Unit - I**

1. (क) अधोलिखितयोः कस्य***चिदेकस्य*** मातृभाषया अनुवादः कार्यः। 5×1

(अ) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

(आ) अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्यैवास्ति मे गतिः।।

(ख) अधोलिखितयोः कस्य***चिदेकस्य*** सप्रसङ्गं व्याख्या सुरगिरा देवनागरलिप्या च कार्या। 5×1

(अ) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा।।

(आ) व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः।।

**Unit - II**

2. अधोलिखितेषु ***दशप्रश्नानां*** संक्षिप्तोत्तरं दीयताम् (एकं विहाय सर्वेषाम् उत्तरं **संस्कृतभाषया देवनागरलिप्या** च देयम्)। 1×10

(क) 'रघुवंशम्' इति महाकाव्यस्य रचयिता कः?

(ख) रघुवंशस्य प्रथमः राजा कः?

(ग) रघुवंशस्य मङ्गलाचरणश्लोके कयोः स्तुतिः विहिता?

(घ) 'रघुवंशम्' इति महाकाव्यस्य प्रसिद्धा टीका का?

(ङ) 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य नाम किम्?

(च) राज्ञः दिलीपस्य करनीतिः कीदृशी आसीत्?

(छ) 'मेरुरिवात्मना'– 'आत्मना' इति शब्दस्य अत्र कोऽर्थः?

(ज) राज्ञः दिलीपस्य अर्थसाधनद्वयं किम् आसीत्?

(झ) '..गमिष्याम्युपहास्यताम्'– कः उपहास्यतां गमिष्यति?

(ञ) दिलीपस्य पिता कः?

(ट) दिलीपस्य वंशः केन नाम्ना परिचितः?

(ठ) रविः कथं पृथिवीरसं स्वीकरोति?

## Section - B

### (Marks : 20)

### Unit - I

3. (क) माघकवेः रचनाशैली पाठ्यांशमनुसृत्य सोदाहरणमालोच्यताम्। 10

***अथवा,***

(ख) शिशुपालवधमहाकाव्यस्य प्रथमसर्गमनुसृत्य देवर्षेः नारदस्य अलौकिकम् अवतरणदृश्यं निर्वर्ण्य तं प्रति श्रीकृष्णस्य अभ्यर्थना लिख्यताम्। 10

### Unit - II

4. अधोलिखितेषु यथामति **प्रश्नपञ्चकं संस्कृतभाषया देवनागरलिप्या** च समाधेयम्। 2×5

(क) 'शिशुपालवधम्' इति महाकाव्यस्य प्रथमसर्गस्य नाम किम्?

(ख) कुत्रासीत् वासुदेवस्य निवासस्थानम्?

(ग) नारदस्य उपवीतं काभिः निर्मितम्?

(घ) जगतः आदिपुरुषः कः?

(ङ) मनीषिणः केषां गृहं गन्तुं नाभिलषन्ति?

(च) माघकाव्ये कति सर्गाः सन्ति?

## Section - C

**(Marks : 10)**

**Unit - II**

5. (क) कस्यापि ***एकस्य*** श्लोकस्य व्याख्या कार्या **संस्कृतभाषया** देवनागरलिप्या **च**। 5×1

(अ) येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भूवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति॥

(आ) साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशुनाम्॥

(ख) ***एकस्य*** मातृभाषया अनुवादं करु। 5×1

(अ) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्।
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः॥
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं।
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥

(आ) वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि॥

## Section - D

**(Marks : 15)**

**Unit - II**

6. अधोलिखितेषु किमपि विषय***त्रयम***वलम्ब्य संक्षिप्ता टीका कार्या। 5×3

(क) अमरुशतकम्।

(ख) कुमारसम्भवम्।

(ग) भारविः।

(घ) अश्वघोषः।

(ङ) नैषधचरितम्।